No. ४५६३

Title सांख्यायन सूत्रानुसारि संग्रह वास्तु पद्धति

Author *

Extent १४ पत्राणि Age

Subject धर्मशास्त्रम्

सांख्यायनसूत्रानुसारिसंग्रहवास्तुपूर्त्तिः

प५६२

पद्धतिः

अङ्काः ४५६२

प्रवेशेन च वेश्मन इत्युक्तत्वात् २

श्रीगणेशाय नमः ॥ अथ शांखायनसूत्राद्यनुसारी सग्रहवास्तुशांतिर्लिख्य
ते । तत्र सुदिने प्रातः कृत्यं विधाय वैश्वदेवपूर्वकमाभ्युदयिकश्राद्धं कुर्यात् । ततश्चा
चम्य प्राणानायम्य मांगल्यतिलकं स्वस्तिनो मिमीतामित्यादि रु० ५ ततः सुमुखश्चेत्या
दि गणपतिं स्मृत्वा अद्येत्यादि देशकालौ संकीर्त्य गृहारंभादौ अस्य वास्तोः कृतता सि
द्ध्यर्थं नवग्रहमखयुतां शालाकर्मयुतवास्तुशांतिं करिष्ये । यदि गृहे नूतनः कूपः कारि
तस्तदा कूपोत्सर्गोपि तंत्रेणैव कारणीयश्चेत्तत्र संकल्पः । अद्येत्यादि० धर्मकूपोत्सर्गयुत
शालाकर्मादि सग्रहवास्तुशांतिं करिष्ये इति संकल्प्य । तदंगत्वेन आचार्यादीनां मधु
संपादनमहं करिष्ये इति संकल्प्य । आचार्यं १ ऋत्विजः ४ वस्त्रैरुणमविर्य ततः स्वाग ग्रहा० २
तं वो द्धि० तामि ॥ प्रतिगृह्यतां प्रतिगृह्णामि । अस्मिन् सग्रहवास्तुशांतिकर्मणि ऋग्वेदमूर्ते १

आचार्यएतत्तेपाद्यंएतत्तेअर्घ्यंचप्रजास्वस्तिनइंद्रो·प्रजापादम्·आचमनंएवंचतुर्णा
मृत्विजामपि।ततस्त्वपादौम्·आच·ॐविष्णुः२हरिः२अपवित्रः·इदंविष्णु·ोसस्वा
धा·वरणमाद्योप·स्त।नृ·७तस्मवि·उपास्मै·मधु२अद्येत्यादिआचार्यादिचतुर्णामृ
त्विग्वरणार्चनमहंकरिष्ये।अस्मिन्सग्रहवास्तु·णिअद्दस्मगोत्रमदद्रशर्माणम
दद्यास्वाध्यायिनमाचार्यत्वामहंवृणे।नानागोत्रान्नानाशाखाध्यायिनोयुष्मान्
ऋत्विजोवृणे।ततस्तान्संपूज्ययथाशक्तिगंधाद्यर्चनंकुंडलमुद्रिकावस्त्रांश्चथवातन्मत्या
मायमनसिसंकल्पितंद्रव्यंआचार्यप्रमुखऋत्विग्भ्योहंसंप्रददे।ततस्तेभ्योयज्ञोपवी
तवस्त्रादिकंदद्यात्।इमानि·स्त·ॐअद्यन्नमो·हरि।यथादास्यमानंभोजनमा·भ्योहं
संप्रददे।ततःपुण्याहंदी·तु।अस्यवरणार्थं·हिरण्य·आचार्यादिभ्योहंसंप्रददे।दक्षि

णः पां॰ स्वस्ति ३ अस्य वरुणार्चनकः यन्मू॰ स्व । गृहे हे स्व । वरुणाशाः । ततः अस्य यागस्य नि॰
ततः आचार्यः कर्म करिष्ये प्रतिज्ञाय गौरसर्षपानादाय प्रतिदिशं विकिरेत् प्रतिमंत्रं । यदत्र
संस्थितं भूतं स्थानमाश्रित्य सर्वदा । स्थानं त्यक्त्वा तु तत्सर्वं यत्रस्थं तत्र गच्छतु ॥१॥ अपसर्पं
तु ते भूता [illegible] ॥ ये भूता भू
मिसंस्थिता । ये भूता विघ्नकर्त्तारस्ते नश्यंतु शिवाज्ञया ॥२॥ अपक्रामंतु भूतानि पिशाचा
स्सर्वतो दिशं । सर्वेषामविरोधेन ब्रह्मकर्म समारभे ॥३॥ भूतप्रेतपिशाचाद्या अपक्रामं
तु राक्षसाः । स्थानादस्माद्व्रजं त्वन्यत्स्वीकरोमि भुवं त्विमां ॥४॥ इति भूतान्संत्रास्य ततो गाय
त्र्या गोमूत्रं । गंधद्वारेति गोमयं । आप्यायस्वेति क्षीरं । दधिक्राव्णा इति दधि । घृतंमिमिक्ष
इति घृतं । आपो हि ष्ठेति कुशोदकं चैकत्रादाय प्रणवेनालोड्य । शुची वो हव्येति तच्चेनकु २

कूपोत्सर्गसहिते तु तद्बहिर्गत एकं हस्तमात्रमधिकं कुर्यात्। तत्रमंडलप्रकारस्तु पत्रांतरे लिखितोऽस्ति

शैः सर्वं गृहं प्रोक्षेत्। ततो मध्ये एकहस्तमितं चतुरस्रं सयोनि त्रिमेखलं कुंडं चतुरंगुलो
त्सेधं स्थंडिलं वा विधाय तत्पूर्वत ईशानतश्च हस्तमितं द्वादशांगुलोच्छ्रितं वेदिकाद्वयं कुर्या
त्। तयोः पूर्ववेद्या ईशानादिकोणेषु चतुरश्शंकून्निखनेत्। तत्र मंत्रः। ॐ विशंतु भूतले नागा
लोकपालाश्च सर्वतः। अस्मिन् गृहेऽवतिष्ठंतु आयुर्बलकरास्सदा। १ इति प्रतिरोपणं मंत्रावृ
त्तिः। ततो रोपणक्रमेण शंकुपार्श्वे माषभक्तबलीन्दद्यात्। अग्निभ्योऽथ सर्पेभ्यो ये चान्ये
तत्समाश्रिताः। तेभ्यो बलिं प्रयच्छामि पुण्यमोदनमुत्तमं॥१ इति पूर्ववन्मंत्रावृत्तिः। ततः कुंडे स्थं
डिले वा पंचभूसंस्कृत्य अग्निं ध्यामीतिमंत्रेणाग्निं प्रणीय परिसमुह्याग्नेरुत्तरतः प्राग
यान्नवान् कुशानास्तीर्य तेषु प्राचीं गृहादानीतं नवमुदकुंभं स्योना पृथिवीत्यादिभिर्मंत्रैः
प्रतिष्ठाप्य। अरिष्टास्माकं वीरा मा परासेचि नो धनं। इत्यभिमंत्र्य। ततः परिस्तरणादि स

२ निरन्नेतु प्राकृत एव मंत्र इति सुकृतरं प्रतिभाति

अत्रावसरे कूपोसि· वरुणाय जुष्टं गृह्णामि। इति पायसं यवमयं चरुं गृह्णीयात्। एवमासादनप्रोक्षणे।२

वितुर्थइत्यं तं कृत्वा चरुद्वयग्रहणं। आदित्याय सोमाय भौमाय बुधाय बृहस्पतये शुक्राय श
नैश्चराय राहवे केतुभ्यो जुष्टं गृह्णामि।२ चतुर्थं तूष्णीं। एवमासादनं। वास्तोष्पतये जुष्टं
गृह्णामि २ चतु· तूष्णीं। एवमासादनं। आदित्याय सो· केतुभ्यस्त्वा जुष्टं प्रोक्षामि। वास्तोष्पतये
त्वा जुष्टं प्रोक्षामि। ततश्चरुस्थाल्यामावधिश्रयेत्। तत ईशानवेद्यां पट्टवस्त्रमास्तीर्य
तस्मिंश्चंदनादिभिस्तंडुलैर्वा अष्टदलं विधाय तत्र ग्रहायतनानि विलिख्य तेषु ग्रहयज्ञो
क्तमार्गेणादित्यादिग्रहान् संस्थाप्य तत्रैशान्यां कनककलशं च स्थाप्य पंचोपचारैः पूजयेत्।
ततो वास्तुवेद्यां वस्त्रोपरि कुंकुमादिना सुवर्णशलाकया· शांता यशोवती कांता विशाला
प्राणवाहिनी। सती च सुमती नंदा सुभद्रा सुरथा तथा। इति उँकारादिनमोन्तैश्चतुर्थ्यंतै
र्नामभिः पश्चादारभ्य प्रागायता उदक्संस्थाः समांगुलांतरालाः दशरेखाः कार्याः एवं

४ तच्चमंडलंपत्रांतरेलिखितमस्ति

हिरण्यासुव्रतालक्ष्मीर्विभूतिर्विमलाप्रिया।जयाज्वालाविशोकाचइडाचेतिदशास्मृताः।
ॐकारादिनमोंतैस्तथैवचतुर्थ्यंतैर्नामभिः समांतरालादक्षिणतश्चारभ्याउदगायताःप्राक्
संस्थाःसमाद्यंगुलांतरालादशरेखाःकार्याः।एवंसतिएकाशीतिपदंमंडलंसंपद्यते॰तत्र
कानिचित्पदानिविलुप्यपंचचत्वारिंशत्पदंसंपाद्यतस्मिन्नीशानकोणपदादारभ्यप्राति
मास्तुतंडुलपुंजेषुवाशिख्यादिदेवताःप्रणवादिनमोंतैश्चतुर्थ्यंतैर्नाममंत्रैरावाह्यस्था
पयेत्।तद्यथा।तत्रेशानकोणेएकपदेवास्तोःशिरसिॐशिखिनेनमःशिखिनंआवाहयामि
स्थापयामि।एवमग्रेपि।तद्दक्षिणैकपदेदक्षिणनेत्रेॐपर्जन्यायनमःपर्जन्यमावाहयामि
स्थापयामि।तद्दक्षिणपदेतत्पश्चिमपदेचदक्षिणश्रोत्रेॐजयंतायनमःजयंतं॰३तद्दक्षिण
पदद्वयेदक्षिणांसेॐकुलिशायुधायनमःकुलिशायुधं॰४तद्दक्षिणपदद्वयेदक्षिणबाहौ

ॐसूर्यायनमः।सूर्यं·५।तद्दक्षिणबाहावेवॐसत्यायनमःसत्यं·६॥तद्दक्षिणपदद्वयेदक्षि
णकूर्परेॐभृशायनमःभृशं·७॥तद्दक्षिणोपरिस्थैकपदेदक्षिणप्रबाहावाकाशायन
मःआकाशं·८॥तद्दक्षिणाग्नेयकोणैकपदेदक्षिणप्रबाहावेवॐवायवेनमःवायुं·९॥
तत्पश्चिमैकपदेदक्षिणमणिबंधेॐपूष्णेनमःपूषणं·१०॥तत्पश्चिमपदेतदुत्तरपदेच
दक्षिणपार्श्वेॐवितथायनमःवितथं·११॥तत्पश्चिमपदद्वयेदक्षिणपार्श्वेएवॐगृहक्ष
तायनमःगृहक्षतं·१२॥तत्पश्चिमपदद्वयेदक्षिणोरुभागेॐयमायनमःयमं·१३॥तत्प
श्चिमपदद्वयेदक्षिणजानुप्रदेशेॐगंधर्वायनमःगंधर्वं·१४॥तत्पश्चिमपदद्वयेदक्षिण
जंघायांॐभृंगराजायनमःभृंगराजं·१५॥तत्पश्चिमोपरिस्थैकपदेदक्षिणस्फिचिॐमृगा
यनमः।मृगं·१६॥तत्पश्चिमनैर्ऋत्यकोणैकपदेपादयोःॐपितृभ्योनमःपितॄन्·१७॥तदु ४

नैरैकपदेवामस्फिचिॐदौवारिकायनमःदौवारिकं·१८॥तदुत्तरपदेतस्मात्पदेचवाम
जंघायांॐसुग्रीवायनमःसुग्रीवं·१९॥तदुत्तरपदद्वयेवामजानौॐपुष्पदंतायनमःपुष्पदं
तं·२०॥तदुत्तरपदद्वयेवामोरौॐजलाधिपायनमःजलाधिपं·२१॥तदुत्तरपदद्वयेवामपा
र्श्वेॐअसुरायनमःअसुरं·२२॥तदुत्तरपदद्वयेवामपार्श्वेएवॐशोषायनमःशोषं·२३॥
तदुत्तरोपरिस्थैकपदेवाममणिबंधेॐपापायनमःपापं·२४॥तदुत्तरवायव्यकोणैकपदेवा
मप्रबाहौॐरोगायनमःरोगं·२५॥तस्मागेकपदेवामप्रबाहावेवॐअहयेनमःअहिं·२६॥
तस्मात्पदेतद्दक्षिणपदेचवामकूर्परेॐमुख्यायनमःमुख्यं·२७॥तस्मात्पदद्वयेवामबाहौ
ॐभल्लाटकायनमःभल्लाटकं·२८॥तस्मात्पदद्वयेवामबाहावेवॐसोमायनमःसोमं·२९॥
तस्मात्पदद्वयेवामांसेॐनागायनमःनागं·३०॥तस्मात्पदद्वयेवामश्रोत्रेॐअदितयेनमः

अदितिं·३१॥तत्रागुपरिस्थैकपदेवामनेत्रेॐदितयेनमः दितिं·३२॥तद्दक्षिणेशिखिपदाधः
कोणैकपदेमुखेॐआपायनमः आपं·३३॥आग्नेयेवायुपदाधःकोणैकपदेदक्षिणह
२त्रे स्तेॐसावित्रायनमःसावित्रं·१३४॥नैर्ऋत्येपितृपदाधःकोणैकपदेइंद्रियेॐजयायनमःज
यं·३५॥वायव्येरोगपदाधःकोणैकपदेवामहस्तेॐरुद्रायनमःरुद्रं·३६॥मध्यनवपदास्सर्व
5 पदत्रयेदक्षिणस्तनेॐअर्यम्णेनमःअर्यमणं·३७॥तद्दक्षिणाग्नेयकोणैकपदेदक्षिणहस्तेॐ
सवित्रेनमःसवितारं·३८॥तत्पश्चिमपदत्रयेजठरदक्षिणभागेॐविवस्वतायनमःवि स्वतं
वस्वंतं·३९॥तत्पश्चिमनैर्ऋत्यकोणैकपदेचरणयोःॐविबुधाधिपायनमःविबुधाधिपं·
४०॥तदुत्तरपदत्रयेजठरवामभागेॐमित्रायनमःमित्रं·४१॥तदुत्तरवायव्यकोणैकपदे
वामहस्तेॐराजयक्ष्मणेनमःराजयक्ष्माणं·४२॥तत्प्राक्पदत्रयेवामस्तनेॐपृथ्वीधराय ५

नमः पृथ्वीधरं ४३॥ तत्राग्नीशानकोणैकपदे उत्तरस्मिं ॐ आपवत्सायनमः आपवत्सं ४४॥ ततो
मध्यनवपदेषु ब्रह्माणं ॐ ब्रह्मणे नमः ब्रह्माणं ४५॥ तदीशानेस्योनेत्यादिभिर्मंत्रैः कल
शं स्थाप्य तस्मिन् गंधौषधीयवदूर्वापंचपल्लवसप्तमृत्तिकापंचरत्नानि प्रक्षिप्य वस्त्रे
णावेष्ट्य तस्मिन्नवपूर्णपूर्णपात्रं निधाय तत्र वास्तोः सुवर्णप्रतिमामग्न्युत्तारणपू
र्वकं स्थापयेत्। तत्र मंत्रः वसिष्ठो वास्तोष्पतिस्त्रिष्टुप् ॐ वास्तोष्पते प्रति- दे ततो मंडल
स्य बहिरीशानाग्नेयनैर्ऋतवायव्यकोणेषु क्रमेण चरकीं १ विदारिकां २ पूतनां ३ पापराक्ष
सीं ४ स्था- पूर्वादिचतुर्दिक्षु क्रमेण स्कंदं १ अर्यमणं २ जृंभकं ३ पिलिपिच्छं ४ स्था- ततः प्रागाद्य
ष्टदिक्षु इन्द्रादिदिक्पालांस्तत्तन्मंत्रैर्नाममंत्रैर्वा संस्थाप्य तदस्त्वितिप्रतिष्ठां विधाय आ
सनाद्युपचारैः प्रत्येकमेकत्र वा संपूज्य प्रार्थयेत्। आगच्छ वास्तुदेवेश सर्वदेवैरधिष्ठित।

भगवन्कुरु कल्याणं यज्ञेऽस्मिन्संनिधो भव। इति। अत्रावसरे कूपोत्सर्गयुक्तश्चेत्तदा वारु
णमंडले उत्सर्गोक्ता देवताः स्थाप्य तन्मध्ये कलशं संस्थाप्य तदुपरि वरुणादिप्रतिमायुतां पा
त्रीं स्थापयेत्। तद्विधिश्च तत्रैवोक्तः। ततो जापकाः स्वस्त्ययनं राक्षोघ्नानि वास्तुसूक्तानि ज
6 पेयुः एकं रुद्राध्यायं रुद्रकलशे जपेत्। ततः रात्रीसूक्तं च रौद्रं च पावमानं सुमंगलं। जपेरन्
पौरुषं सूक्तं सर्वतो बह्वृचाः पृथक्॥१॥ शाक्रं रौद्रं च सौम्यं च कूष्मांडं जातवेदसं। सौरं सूक्तं ज
पेरंस्ते दक्षिणे न यजुर्विदः॥२॥ वैराजं पौरुषं सूक्तं सौपर्णं रुद्रसंहिता। शैशवं पंचनिधनं गा
यत्रं ज्येष्ठसाम च॥३॥ वामदेव्यं बृहत्सौम्यं रौरवं च रथंतरं। गवां व्रतं विकर्णं च राक्षोघ्नं च यश
स्तथा। गायंति सामगा राजन् पश्चिमद्वारमाश्रिताः॥४॥ आथर्वणाश्चोत्तरतः शांतिकं पौष्टि
कं तथा। जपेरन्मनसा देवमाश्रिता वरुणं प्रभुं॥५॥ ततः श्रुताभिघारणाद्याज्यभागांतं कृत्वा ६

६ इत्यादि जपश्च कूपोत्सर्गेऽपि कार्यः। अत्र वामदेव्यसाम च गापयेत्।

गृह्यप्रोक्तमार्गेणग्रहहोमंकुर्यात्॥ ततआदौगृहारंभात्पूर्वंशालाकर्माकृतंचेत्तदा
अत्रावसरेशालाकर्मकालातिक्रमदोषपरिहारार्थंसर्वप्रायश्चित्तंकरिष्ये इतिसंकल्प्य
ॐभूर्भुवःस्वःस्वाहा। ॐअयाश्चाग्ने॰भेषजंस्वाहा। इतिसर्वप्रायश्चित्ताहुतीकृत्वाउदुंबर
शाखयाॐइहान्नाद्यायविशःपरिगृह्णामि। इतिमंत्रेणतांगृहभूमिंसर्वतःत्रिरुल्लिखेत्।
ततआज्याहुतीर्जुहुयात्। तद्यथा। ॐ कोसिकस्यासिकायतेग्रामकामोजुहोमिस्वाहा। ॐ
अस्यांदेवानामसिभागधेयमितःप्रजाताःपितरःपरेताः। विराट्त्वंजुहुकग्रामकामोनदे
वानांकिंचनांतरेणस्वाहा। ततोगृहभूम्यांचतसृषुदिक्षुद्वारशाखानिमित्तंद्वौद्वौगर्तौ
निखवेयौ। मध्येचैकोगर्तः। एवन्नवगर्तान्खानयित्वातेषुउदकमिश्राःसक्तवआसिच्य
पूर्वादिचतसृषुदिक्षुप्रदक्षिणक्रमेणतेषुगर्तेषुघृताक्ताअष्टौउदुंबरशाखानिखनेत्।

तत्र मंत्रौ । इमां विमिन्वे अमृतस्य शाखां मधोर्धारां प्रतरणीं वसूनां । एनां शिशुः क्रंदत्या कुमा
र एनां धेनुः क्रंदतु नित्यवत्सा । इति पूर्वस्यां दिशि दक्षिणगर्त्ते निदधाति ॐ इमामुच्छ्रयामि भुव
नस्य शाखां मधोर्धारां प्रतरणीं वसूनां । एनां शिशुः क्रंदत्या कुमार एनां धेनुः क्रंदतु पाकवत्सा ।
ॐ इति पूर्वस्यामेवोत्तरगर्त्ते निदधाति । इमावेव मंत्रौ सर्वत्र । एवं दक्षिणद्वारि प्राक्संस्थं · पश्चि
मद्वारि उदक्संस्थं · उत्तरद्वारि प्राक्संस्थमिति प्रतिदिशं द्वे द्वे शाखे निखनेये · ततो मध्यगर्त्ते म
हतीं स्थूलामुदुंबरशाखां सकलगृहस्यागारदामत्वाकूणा राजसंज्ञकां निखनेत् । तत्र मंत्रः ।
ॐ इमामहमस्य वृक्षस्य शाखां घृतमुदंती ममृतो मिनोमि । एनां शिशुः क्रंदत्या कुमारश्चास्यं
दंतां धेनवो नित्यवत्साः । ततः ॐ एनं कुमारस्तरुण आवत्सो जुवनस्य परि । एनं परिस्रुतः कुंभ्या आद
धः कलशैर्गमत् । इहैव स्थूणे प्रतितिष्ठ ध्रुवाश्वावती गोमती सीलमावती हे मे तिष्ठ हमुदमाणे

रेवतिष्ठनिमित्तानीति त्विलास्याजिरावतीमध्येपोषस्य त्वंपतांमात्वाप्रापन्नद्यायवः
उपहूता इहगाव उपहूता अजावयः। अथो अन्नस्य कीलाल उपहूतो गृहेषु नः। मध्यंतरेप्र
तितिष्ठ वामदेव्येभ्ययस्वस्त्वहृदतिस्तनाय। इतिस्थूणाराजमभिमृशति। ततः प्राच्यादिद्वारस्थू
णाः खननक्रमेण प्रतिमंत्रमभिमृशेत्। तत्र मंत्राः ॐ सत्यं च· ॐ श्रद्धां च इति पूर्वे ॐ यशश्च· ॐ
दक्षिणा च· इति दक्षिणे ॐ बलं च· ॐ ओजश्च· इत्यपरे· ॐ ब्रह्म च· ॐ क्षत्रं च· इति उत्तरे। ॐ श्री
स्तपः इत्यनेन वास्तुमध्यमभिमृशेत्। गृहमध्यभूमिस्थूणाराजस्य आलवालं इत्यर्थः। ॐ धर्मः
स्थूणाराजः। इति मध्यस्तंभमभिमृशेत्। ॐ अहः। ॐ रात्रिः। इत्येताभ्यां मंत्राभ्यां प्राच्यादिद्वारा
णामधस्तनं काष्ठं उत्तरकाष्ठं च क्रमेण मंत्रावृत्त्या अभिमृशेत्। ॐ संवत्सरः। इति प्रतिद्वारं कु
पाटमभिमृशेत्। ततो घृताभ्यक्तं पाषाणं स्थूणाराजस्य आलवालस्य अधस्तात् निखनेत्। मं

वः। प्रतिरथः सुपर्णस्त्रिष्टुप्। ॐ उद्धा समुद्रो अरुणः॰ तौ। इति शालाकर्म। ततः पूर्वाह्णमध्याह्ना
पराह्णे वास्तुकर्माणि तंत्रेणाक्रियमाणेषु अतीतकालानामुत्कर्षेण अनागतानांचापकर्षेण
सर्वप्रायश्चित्तपूर्वकं कार्याणि। वसिष्ठ इन्द्रो बृहती उत्तरयोः ककुभौ। ॐ अजिता भवतो॰ तस्तुभः
स्वाहा। ॐ ईशानमिन्द्र तस्थुषो न त्वावाँ॰ वः। न जा॰ तेस्वाहा। ॐ मजातो॰ नेश्वा॰ नः। गव्यं॰ हे स्वा
हा। वामदेव इन्द्रो गायत्री। ॐ कया नश्चित्र॰ वृता स्वाहा। ॐ कस्त्वा सत्यो॰ वसु स्वाहा। ॐ अभीषु
णः स॰ तिभिः स्वाहा। शंयुरिन्द्रो बृहती उ॰ ककुभौ। ॐ त्वामिद्धि हवाम॰ नः स्वाहा। ॐ त्वां काष्ठास्व॰
तः सत्वं॰ या। महस्त॰ व स्वाहा। ॐ महस्त वानो॰ रंसत्रा॰ धे स्वाहा। इति नवाज्याहुतीर्हुत्वा
पवास्तोष्पत्यचरुणा नवाहुतयश्चतुरवत्तया होतव्याः। तद्यथा॰ ॐ भूः स्वाहा। ॐ भुवः स्वा
हा। ॐ स्वः स्वाहा। ॐ भूर्भुवः स्वः स्वाहा। वसिष्ठो वास्तोष्पतिस्त्रिष्टुप्। अमीवहेति गायत्री।

ॐवास्तोष्पतेप्रति॰देस्वाहा।ॐवास्तोष्पतेप्रत॰स्वरूस्वाहा।ॐवास्तोष्पतेश॰नस्स्वाहा।ॐ
अमीवहा॰नस्स्वाहा।इतिविधिर्वास्तोष्पतिर्हृहती।ॐवास्तोष्पतेध्रुवा॰स्वास्वाहा।इतिन
वाहुतीर्हुत्वा।ततःशिरवादिस्य।पितृदेवताभ्यश्चतुर्थ्यंतैर्नामिमंत्रैः प्रत्येकमष्टसहस्र
मष्टशतमष्टाविंशतिरष्टौवामाभिरित्याज्याहुतीर्हुत्वातदर्द्धसंख्ययाचरूपादिभिर्जु
हुयात्।अत्रोदुंबरस्यसमिधोहुतव्यास्तदलाभेऽन्यवृक्षादीनामपि॰तिलाःकृष्णाएवक्षे
त्रितिलस्थानेयवानाहुः।इतिवास्तुहोमः।अत्रावसरेकूपोत्सर्गस्तुत्क्ष्येतदाॐत्वन्नोअ
ग्नेव॰स्मस्वाहा।ॐसत्वन्नो॰धिस्वाहा।ॐअवतेहे॰निस्वाहा।ॐइमम्मेवरुणश्रु॰केस्वाहा।ॐ
उदुत्तमंवरुण॰मस्वाहा।ॐइमांधियंशि॰मस्वाहा।इतिचरोःपलाहुतयः।ॐरहायस्वा
हा।ॐअपत्यायस्वा।ॐमयोभुवेस्वा॰ॐआरववायस्वा॰ॐनिरववायस्वा॰ॐनिस्सरायस्वा॰

वास्तुशांतिः
९

ॐनिकामायस्वा·ॐसपत्नदूषणायस्वा·इत्यष्टावाज्याहुतीर्वारुण्यादिक्रमेणाग्निप्रदक्षि
णमग्नौजुहुयात्।ॐविश्वतश्चक्षुरुत·कस्वाहा।ॐइदंविष्णु·रस्वाहा।इतिपयसाहुतीम
ध्येजुहोति।ततोवारुणमंडलेस्थापितदेवताभ्यस्तिलैःप्रत्येकमष्टावाज्याहुतीर्जुहुयात्।
ततोग्रहयज्ञोक्तमार्गेणग्रहाणांपुनःपूजनंविधायवास्तुपीठेशिख्यादीनांपुनःपूजनंकु
र्यात्।तद्यथा।अद्येत्यादि·शिख्यादिस्थापितदेवतासहितस्यवास्तोःपुनःपूजनमहं
करिष्ये।इतिसंकल्प्य।आसनादिषोडशोपचारैःपूजनं।तत्रनैवेद्यादिकंतुप्रकोम
स्यांशिख्यादीनांनैवेद्यार्थमेतानिद्रव्याणिआहरेत्।ओदनंसघृताक्तंतुशिखिनेविनि
वेदयेत्।ओदनंसोत्पलंदद्यात्पर्जन्यायघृतान्वितं।१।ध्वजंपीतंजयंतायपैष्टंकूर्मंचविन्यसे
त्।इंद्रायपंचरत्नानिपैष्टिकंकुलिशंतथा।२।वितानकंतुसूर्यायपयसक्तूंस्तथैवच।सत्या ९

यघृतगोधूमंमत्स्यान्नंतुमत्स्यायच॥३॥राक्षुकुल्माषांतदित्यायपद्मिमांसंतुवायवे।नागाः
स्वपणेतुदातव्याचितधेचलकोदनं॥४॥बृहत्क्षत्रायमधुनलंयमायपिशितौदनं।गंधौदनंच
गंधर्वेभृंगेमेषस्यजिह्विकां॥५॥मृगाययावकंदद्यात्कृतपितृभ्यःकृसरंतथा।दौवारिकेच
माषावाकृष्णपिष्टबलिंतथा॥६॥सुग्रीवेऽपूपकान्दद्यात्पुष्पदंतायपायसं।कुशास्तंबेनसंयु
क्तंतथापद्मंजलाधिपे॥७॥पिष्टंहिरण्मयंदद्यात्सुरायसुरांतथा।घृतौदनंचशोषायगोधू
मान्पापयक्ष्मणे॥८॥घृतलड्डुकांस्तुरोगायअहोतुब्धफलंतथा।मद्यंमुख्यायदातव्यंमु
क्तौदनमतःपरं॥९॥भल्लाटायदद्यात्तुसोमायमधुपायसं।नागायशालिकंपिष्टंअदि
त्यैपोलिकांतथा॥१०॥दितेस्तुलकरिकांदद्यात्क्षीरमापापवेतथा।सावित्रेलड्डुकांदद्याज्जया
यचघृतौदनं॥११॥गुडपायसंतुरुद्रायअर्यम्णेशाकरंतथा।सवित्रेतुगुडापूपंदद्याद्वस्तो

दकं तथा ॥१२॥ विवस्वते पुनर्दद्याद्रक्तचंदनपायसं । विबुधाधिपाय दातव्यं हरितालं घृतौदनं ॥
१३॥ गुडौदनं तु मित्राय दद्यात्स्वसोदकं तथा । आपे मकं तथा मांसं देयं स्याद्राजयक्ष्मणे ॥१४॥
दद्याच्छागस्य मांसं तु कूष्मांडं वा धराधरे । आपवत्साय दातव्यं दधिसांद्रं च पुष्कलं ॥१५॥ पंच
गव्यं यवांश्चैव तिलान्हुतं हविष्यकं । मद्यं भोज्यं च विविधं ब्रह्मणे च निवेदयेत् ॥१६॥ माषकल्क
बलिं दद्यान्मांसौदनसमन्वितं । ईशानभागमाश्रित्य चरक्यै विनिवेदयेत् ॥१७॥ मांसौदनं स
रुधिरं हरिद्रौदनमेव च । आग्नेयीं दिशमाश्रित्य विदार्यै विनिवेदयेत् ॥१८॥ दध्योदनं सरुधि
रं मत्स्यखंडैश्च संयुतं । नैर्ऋतीं दिशमाश्रित्य पूतनायै निवेदयेत् ॥१९॥ मत्स्यमांससुरासर्व
विचित्रान्नं तथैव च । वायव्यां दिशमाश्रित्य पापायै विनिवेदयेत् ॥२०॥ सुरारुधिरसंदायत्र
र्यम्णो मण्डलकः । जंभके मांसरुधिरे पिलिपिच्छे तथैव च ॥२१॥ एषामलाभे विप्रेभ्यो माषान्न

10

कं बलिं तथा। पायसं वापि दातव्यं तन्नाम्ना सर्वतः क्रमात्॥२२॥ एवं संपूजिता देवाः शांतिं
कुर्वंतु ते सदा। सर्वेभ्यः कांचनं दद्यात् ब्राह्मणे गां पयस्विनीं॥२३॥ ततो बलिविदानं। बलिं गृह्णंतु
मे देवा आदित्या वसवस्तथा। मरुतश्चाश्विनौ रुद्राः सुपर्णः पन्नगा ग्रहाः। असुरा यातुधाना
श्च पिशाचा डाकिनी तथा गणाः। शाकिन्यो यक्ष वैताला योगिन्यः पूतनादयः। जंभकाः सिद्धगं
धर्वा यमा विद्याधरास्तथा। दिक्पाला लोकपालाश्च ये च विघ्नविनायकाः। जगतां शांतिकर्तारं
ब्रह्माद्या। आन्तानि बलिं गृह्यत्वा विधिवत्समुपस्थितां। अन्यत्र वापि कुर्वंतु मं तु सुखेन गच्छंतु नमोस्तु तेभ्यः। इ
ति स्थंडिले चतुर्दिक्षु चरुभोजनेन बलीन् दत्वा ब्रह्मादिपंचभ्यो माषभक्त बलिं दद्यात्। तद्यथा। पा
यसौदनलाजेश्च युक्तं धूपैः प्रसूनकैः। अक्षतानि ह युक्तं च माषभक्तादिमंडितं। गृहाणेमं बलिं
ब्रह्मन् वास्तुदोषप्रणाशाय। इति ब्रह्मणे एष बलिं नमः। गंधाद्याकरयुक्तं पायसोपरि संस्थितं।

अर्यमाभ्ये गृहाणेमं सर्वदोषप्रनाशाय। अर्यम्णेए॰। चंदनाद्यर्चितं नाथ कर्पूरागरुमंडितं।
विवस्वंस्त्वं गृहाणेमं सर्वदोषप्रनाशाय। विवस्वतेए॰। स्फुटं पायसं नाथ पुष्पादिभिः समन्वितं।
गृहाणेमं बलिं हृद्यं मित्रशांतिं प्रयच्छ मे। मित्रायए॰॥ माषोदनं समांसं च गंधादिभिः समन्वितं। गृ
हाणेमं बलिं देव सर्वदोषप्रनाशाय। पृथ्वीधरायए॰। मातरो भूतवैतालाश्चैवान्ये बलिकांक्षिणः
विघ्नाः पारिषदाये च ते पिगृह्णंत्विमं बलिं। इति सर्वभूतेभ्यए॰। अथ चक्रबोजलौव गृहस्याष्टौ दि
क्षु बलिं दद्यात्। चरकीं विदारिकां पूतनां पापराक्षसीं उद्दिश्य गृहस्येशानादिकोणेषु दद्यात्।
उग्रसेनं डामरं महाकालं पिलिपिच्छमुद्दिश्य गृहस्य प्राच्यादि दिक्षु दद्यात्। इति गृहबलिः। अ
चावपातकूपोदकं युक्तस्वेच्छदायापणमंडलेभ्यः पितृदेवतानां पुनः पूजनं। ततो वहिःपूजनम्।
ततो यजनीयदेशात्परितः इंद्रादिकपालाननुद्दिश्य माषबलिं दद्यात्। ततः स्नानं कृतिः। ततः स्व ११

स्विष्टकृदादिबर्हिर्होमांतंकृत्वाततःसूत्रवेष्टनादिगृहप्रवेशांतंकृत्वा·ततोहोमसंकल्पाद्यभिषेकांतंकृत्वाप्रणीतावि
मोकादिशांत्यंतंकुर्याद्वाइत्यपरोवाक्रमः॥१
ष्टकृदादिबर्हिर्होमांतंकृत्वाहोमेसंकल्पः।अनेनयुल्याहंदीर्घः·सुशांतिर्भवतु।अस्मिन्समयहवा
स्तुशांतिकर्मणियद्यद्द्रव्यंयाकाचित्·सासादेवताःप्रीयंतां।तेदेवाःशांतिदासंतु।अस्यसमयव
वास्तुशांतिकर्मणःसम्यक्अर्थंययासंपन्नेनानेनतत्·यथासंख्यकान्ब्राह्मणानहंतर्पयिष्ये।
अस्यकर्मणःसांगतासिद्ध्यर्थंगृहांगत्वेनधेन्वादिसुकृत·द्रव्यंवास्तुअंगत्वेनपयस्विनींधेनुं
सोपस्करांशय्यांहिरण्यंदक्षिणांचतन्मनःसं·द्रव्यंवाआचार्यप्रमुखेभ्यऋत्विग्जापकेभ्योऽहं
संप्रददे।अस्यकर्मणोन्यूनार्थंभूयसीं·नानाहंसंप्रददेदक्षिणाःपांत्वित्यादि·स्वस्तिश्रेअस्त्वा
वसरेकूपोसर्वांगत्वेनाचार्यायसुवर्णजिह्वतांधेनुंवस्त्रयुग्मेसोपस्करांशय्यांपात्रींचद
द्यात्।ततोवास्तुकलशाज्जलमुद्धृत्यसपत्नीकंयजमानमुत्तरतउपवेश्यगृह्यप्रोक्तेवदाभि
षिंचेत्।ततोयजमानोनूतनवस्त्रंपरिधत्ते।ततउंधरायैनमःइतिमंत्रेणपृथिवींसंपूज्यतत

त्रिवृत्सूत्रेणपावमानेनरक्षोघ्नेनचगृहंप्रागादितोवेष्टयेछिन्नैः। छिन्नेसूत्रेऽशुभं। ततोदुग्ध
धाराजलधारांचतैरेवमंत्रैस्तथैवगृहस्यपरितोऽविछिन्नांदद्यात्। ततश्चतुर्दिक्षुगृहोप
रिपताकाआरोपयेत्। ततोगृहस्याग्नेयकोणेजानुदघ्नमवटंखनित्वातंगोमयेनोपलि
प्यशुक्लचंदनपुष्पाक्षतादिभिरलंकृत्यतस्मिन्शाल्यादिसप्तबीजानिदध्योदनंचप्रक्षि
प्यतवकुंभंजलपूर्णंपुष्पैर्फलैश्चयुतंगंधादिभिरर्चितंहस्तद्वयेनादायजानुभ्यामवनिंगत्वा
ॐनमोनारायणायेतिमंत्रेणगर्तेनिधारयेत्। तत्रावर्तेउदक्षिणपुष्पेचोर्ध्वमुखंभुजंगमं
वैपरीत्येऽशुभं। ततोमृन्निर्मितपेटिकायांसप्तबीजदध्योदनशैवालजलफलपुष्पाणि
प्रक्षिप्यपूर्वस्थापितंवृषवास्तुंतस्यमंगलघोषेणानीयतस्यांसंस्थाप्यगंधादिभिःसंपूज्य
प्रार्थयेत्। पूजितोसिमयावास्तोहोमाद्यैरर्चितैःशुभैः। प्रसीदपाहिविश्वेशदेहिमेगृहजंसुखं॥ १२

वास्तुपुरुष नमस्तेऽस्तु भूशय्याभिरत प्रभो। मद्गृहं धनधान्यादिसमृद्धं कुरु सर्वदा। ततः
पेटिकामादाय तस्मिन् गर्त्ते विधानेन निक्षिपेत्। तत्र मंत्रः। सशैलसागरां पृथ्वीं यथा वहसि मूर्द्ध
नि। तथा मां वह कल्याणं संपत्संततिभिः सह। इति। ततो गर्त्तं मृदा पूरयेत्। तत्र मृदश्चाधि
क्ये उत्तमं साम्ये मध्यमं न्यूनत्वे त्वधमफलं विद्यात्। ततो गर्त्तोपरि स्थितां भूमिं गोमयेनोपलिप्य गंधा
क्षतपुष्पैरर्चयेत्। अत्रावसरे गृहशिल्पिनो नामानंदं स्वत्वं च संपूज्य तेभ्यो वस्त्रादिकं दद्यात्।
ततस्तु मुहूर्त्ते नूतनगृहं प्रविशेत्। तद्यथा। ज्येष्ठपुत्रेण देवतापीठं गृहतनारिक्थं च धार्यं।
जायया नालिकेरं कुंकुमाक्षतपुष्पदूर्वाक्षतसहितं वर्द्धापनपात्रं धार्यं। स्नुषया कुलदीपको
धार्यः। कनिष्ठपुत्रेण भ्रात्रा शिष्यादिभिश्च धान्यपात्रं गोमहिष्याद्युपस्करादिकं च धार्यं। ततो
यः कुंभः अनेकरत्नः स्थापितः सम्मूलो यजमानेन धार्यः। ततो ज्येष्ठं पुत्रमग्रे कृत्वा स्वयं पुत्र

कलत्रपश्वादिभिः सहगृहं प्रविशेत् । तत्र मंत्रः । इंद्रस्य गृहः शिवाय वसुमंतो वरूथिनस्तान
हं प्रपद्ये सह जायया सह प्रजया सह पशुभिः सह रायस्पोषेण सह यन्मे किंचास्ति तेन । ततः
सकुंभः सप्तधान्योपरि स्थापयेत् । धनधान्यादिकं च यथास्थाने स्थापयेत् । अत्राय सरे कू
पोत्सर्गयुक्तश्चेत्तदा यजमानो यत्किंचेदमिति कूपो मज्जयेत् । ततस्तज्जलेन गोपुच्छेतर्पणं कु
र्यात् । ततआपोअस्मानित्यृचं जप्त्वाऽन्यवस्त्रं परिधाय गौ तां पूजयित्वा मार्कंडसाम गायेद
द्यात् । ततः कुंकुमाक्तेन त्रिरक्तत्रेण जलाद्वायं परिवेष्टय स सुज्येष्ठा इति मंत्रेण गंधपुष्पादिभिः
संपूज्य तत्र सप्तजलमातृः संपूज्य च तत्सरितः इंद्रादिदिक्पालेभ्यो बलिं दद्यात् । ततः कलशो
परिस्थितां पात्रीमानीय पश्चाद्वस्त्वायत त्वा यामीति मंत्रेण यादांसि प्रक्षिपेत् । ततआपो
हिष्ठेति तृचेन तां पात्रीं कूपे न्युब्जां कुर्यात् । ततः कूपं पुनस्संपूज्य पुराणोक्तैर्मंत्रैस्तं प्रार्थ्य कुले १३

13

शांतिकजलमादाय अद्येत्यादि० अमुकसर्वभूतेभ्य इमं कूपं उत्सृजे० ततः सर्वभूतेभ्य उत्सृष्टं मयैत
ज्जलमूर्जितं। रमंतु सर्वभूतानि स्नानपानावगाहनैः। इत्युक्त्वा जलं निक्षिपेत्। नममेति न ब्रू
यात्। स्वस्याप्युपयोज्यत्वात्। ततः इमं मे गंगे इति गंगादिजलं कूपे प्रक्षिप्य आपो हिष्ठेति तृचं
जपन् अविछिन्नदुग्धधारया कूपं त्रिः प्रदक्षिणीकुर्यात्। तत एकं ब्राह्मणं यथेष्टं दुग्धं पाययेत्।
ततो ब्राह्मणैः पुण्याहं वाचयित्वा तेभ्यश्चाशिषो गृहीत्वा यथायथं दक्षिणां दत्वा प्रणिपत्य
विसर्जयेत्। ततःअलीतृाविमोकादिशांत्यंतंकृत्वाऽस्यमयहवास्तुशांतिकर्मणोयन्न्यूनाति
रि० सर्वं परिपूर्णमस्तु। रहैस्यैश्च्रद्धि० मस्तु। ततोऽस्थापितदेवतानां विसर्जनं। ततो ब्राह्मणान् भो
जयित्वा सुहृद्युतः स्वयं भुंजीत॥ इति मयहवास्तुशांतिः॥ संवत् १८१२ शाके १६७७ भाद्रपदशुदि
४ भौमे पट्टणग्रामे पंडितवाणीशंकर रवीमजी सुत नाहस्तांक्षर नी पोथी उपेर लखी छे। पत्र

बा

अथसग्रहवास्तुशांत्युपहाराः।तत्रज्योतिर्विदादिष्टेसुमुहूर्ते·प्रातःकृत्यानंतरं·मातृस्थाप
नार्थंवस्त्रं·तंदुलाः·पुगीफलानि·गणपतिमुर्त्तिः·मुद्रापनं·धूपार्थेगुग्गुलुः·घृतदीपः·पुष्पाणि
बल्यर्थेनारिकेरः·सजलपात्रंचंदनं·कुंकुम·आचमनार्थंजलपात्रं।कुशाः·यवाः·दूर्वाः·गुडः
उदनं·बदरीफलं·सूत्रं·मुद्रापनं·उपवीतानि·आम्रपल्लवस्यतोरणं।अर्घपात्राणि·आस
नं·गौरसर्षपाः·गोमूत्रंगोमयंदुग्धंदधि·एकहस्तमितंचतुरस्रंसयोनित्रिमेखलंकुंडं·च
तुरंगुलोछ्रेकोथस्थंडिलंवा·चत्वारःशंकवः।माषाः।तिलाः।यवाः।ताम्रपात्रं·चरुग्रहणा
र्थंपात्रंउदकुंभंसर्वौषधी·गोमयं·स्रुव·स्रुक्·